# Shri Keshavaraja Ashtakam

# શ્રીકેશવરાજાષ્ટકમ્

## Document Information

Text title : Shri Keshavaraja Ashtakam

File name : keshavarAjAShTakam.itx

Category : vishhnu, vAsudevAnanda-sarasvatI, aShTaka, krishna

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીકેશવરાજાષ્ટકમ્

કશબ્દવાચ્યો કથિતો વિધાતા સ્યાદીશશબ્દેન હરો વિકર્તા ।
તૌ દ્વૌ સ્વશક્ત્યા વશત્યતન્દ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૧॥

ચતુર્ભુજૈઃ સાયુધભૂષણાઢ્યૈર્યો લોકપાલૈરિવ યુક્પ્રભાઢ્યૈઃ ।
જયત્યજસ્રં નિજપા વિનિદ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૨॥

પીતામ્બરાલઙ્કૃતચારુદેહઃ કિરીટકેયૂરધરો વિમોહઃ ।
ભૃત્યાવને યોઽનિશમસ્તતન્દ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૩॥

કલ્પાન્તમેઘદ્યુતિગર્વહર્ત્રી યસ્ય દ્યુતિઃ સ્વાન્તરહર્ષદાત્રી ।
બિભાતિ લાવણ્યનિધિઃ સુધીર્યઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૪॥

મહાવિભૂતિર્જગતીહ દાસી-ભૂતામરસ્ત્રીરપિ યસ્ય દાસી ।
પદસ્ય નિત્યં ધૃતહાસમુદ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૫॥

યો નામદેવસ્ય દૃષ્ટાં સુભક્તિન્ત જ્ઞાત્વાઽપિ બાલસ્ય મુદે હિ દુગ્ધમ્ ।
શિલાત્મનાપીહ પપૌ સુભદ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૬॥

યો દેશિકસ્યાપિ તરાં સુભક્ત્યા તુષ્ટો મહાત્મા તદધીન આસ ।
તદ્વંશજેભ્યોઽપ્યધુના વિતન્દ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૭॥

પ્રસીદ મે કેશવ દીનબન્ધો પ્રસીદ મે કેશવ ચાર્તબન્ધો ।
બન્ધોચ્છિદાર્યોઽસિ કૃપાસમુદ્રઃ સ કેશવોઽત્ર પ્રથિતોઽસ્ત્યુપેન્દ્રઃ ॥ ૮॥

એવં સ્તુતોઽષ્ટભિર્હૃદ્યૈઃ પદ્યૈઃ પાતુ ન આર્તિહા ।
મહાત્મા વાસુદેવેન યતિનાઽસ્તુ ભવાર્તિહા ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં કેશવરાજાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Keshavaraja Ashtakam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*